तञ्च तद्भिन्नत्वे सति तद्भिन्नभिन्नत्वमधिकमन्यतमशब्दे द्रष्टव्यम् अव्युत्पन्नत्वेऽपि अस्य स्वशब्देनोपात्तत्वात् सर्वनामकार्य्यम् । किंयत्तद्भ्योऽन्यत्र डतराद्यभावात् अव्युत्पन्नत्वमिति भाष्य० प्र० उद्योत० । शुभ्रादि० अपत्ये ढक् । आन्यतरेयस्तदपत्ये पुंस्त्री० । [दिवसे ।

**अन्यतरेद्युस्** अव्य० अन्यतरस्मिन्नहनि एद्युस् । अन्यतर-

**अन्यतस्** अव्य० अन्य+सप्तम्याद्यर्थे तसिल् । अन्यत्र अन्यस्मादित्याद्यर्थे । तत्र सप्तम्यर्थे "नैव न प्रियतमोभयथासौ यद्यसुं न वृणुते वृणुते वा । एकतस्तु धिगमूमगुणज्ञामन्यतः कथमदःप्रतिलम्भः इति" नै० "एकतस्तु सकलानि निमित्तान्यन्यतो मनसः प्रतिपत्तिरिति" नीति० "गुरो र्यत्र परीवादोनिन्दा वापि प्रवर्त्तते । कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यत" इति मनुः । पञ्चम्यर्थे तु "या नियुक्तान्यतः पुत्रं देवराद्वाप्यवाप्नुयादिति" मनुः ।

**अन्यतस्त्य** त्रि० अन्यतोऽन्यस्मिन् स्वेतरपक्षे भवः अन्यतस्+त्यप् । सपत्ने । "स य एतमुपास्ते जिष्णुर्हापराजिष्णुर्भवत्यन्यतस्त्यजायीति" श्रुतिः । [कारके ।

**अन्यत्कारक** त्रि० अन्यस्य कारकः ६त० दुक् च । अन्यस्य-

**अन्यत्र** अव्य० अन्यस्मिन्+अन्य+त्रल् । अन्यस्मिन्नित्यर्थे । "अन्यत्र निरूद्रद्रव्येभ्य आश्रितत्वमिहेष्यते इति" भाषा० "न चानुमानगम्यं शास्त्रप्रामाण्यं येनान्यत्र दृष्टं निदर्शनमपेक्षेत इति" अन्यत्र प्रजापतिव्रतादिभ्यः इति च शारी० भा० । प्रकरणबलाच्च कालो देशो वा विशेष्यः तत्र कालः । "अन्यत्र निधनात् पत्युः पत्नी केशान्न वापयेदित्यादौ" निधनकालभिन्ने काले इत्यर्थः । उक्तोदाहरणे तु देश इति । "इतराभ्योऽपि दृश्यन्ते इति" पा० उक्तेः तत्रभवानित्यादिवत् प्रथमार्थे त्रल् । प्रथमार्थे "देवा अन्यत्राश्विभ्यां सत्वं निषेदुरिति" कौ० ब्रा० । अन्यत्र अन्ये इत्यर्थः "अन्यत्र धर्म्मादन्यत्राधर्म्मादन्यत्र कृताकृतात् अन्यत्र भूताच्च भव्याच्चेति" कठ० उप० । धर्म्मादन्यदित्यर्थः ।

**अन्यथा** अव्य० अन्य+प्रकारार्थे थाच् । अन्यप्रकारे "यदभावि न तद्भावि भावि चेन्न तदन्यथेति" हितो० । "अवाप्यते वा कथमन्यथा द्वयमिति" कुमा० । निष्कारणे मेदि० अभावार्थे च "अन्यथानुपपत्तिरिति" ।

**अन्यथाकारम्** अव्य० अन्यथा+कृ+णमुल् । अन्यप्रकारेण कृत्वेत्यर्थे यस्य यथाकरणमुचितं ततोन्यरूपेण कृत्वेत्यर्थे ।

**अन्यथाख्याति** स्त्री अन्यथा अन्यरूपेण ख्यातिर्ज्ञानम् । यस्य यद्धर्म्मवत्त्वेन ज्ञानमुचितं तस्य तद्भिन्नधर्म्मेण ज्ञाने । यथा ह्रदो वह्निमानित्यादिज्ञानम् तच्च भ्रमात्मकं तदभाववति तत्प्रकारकत्वात् । तच्च विशिष्टमेकं ज्ञानं तस्यैव प्रवर्त्तकत्वात् तथा च शुक्तौ रजतत्वभ्रमात् रजतार्थिनस्तद्ग्रहणे प्रवृत्तिरुपजायते इति नैयायिकादयः । मीमांसकादयस्तु तत्र ज्ञानद्वयम् वह्निज्ञानं ह्रदज्ञानञ्च असंसर्गाग्रहवशाच्च तयोः विशिष्टज्ञानकार्य्यकारिता सति च ह्रदे वह्नेरसंसर्गज्ञाने तत्र न प्रवृत्तिरित्यतोऽसंसर्गाग्रह एव तत्र प्रवर्त्तकः अप्रवृत्तिस्तु तदभावे इत्याहुः । वेदान्तिनस्तु धर्म्मिणोऽसन्निकृष्टस्थले नान्यथाख्यातिः किन्तु अलौकिकपदार्थान्तरोत्पत्त्या तस्य लौकिकं प्रत्यक्षं जायते यथा इदं रजतमिति ज्ञानं तद्विवरणमध्यासशब्दे १४० पृष्ठे उक्तम् । अतोऽसत एव तत्र ख्यातिरित्यसत्ख्यातिः धर्म्मिसन्निकृष्टस्थले तु जपासन्निकृष्टस्फटिकादौ अन्यथा ख्यातिरिति भेद इत्यङ्गीचक्रुः ।

**अन्यथानुपपत्ति** स्त्री अन्यथा अभावे न उपपत्तिःअसम्भवः स्वाभावप्रयोज्यासम्भवे, अर्थापत्तिप्रमाणे च तथा हि पीनो देवदत्तो दिवा न भुङ्क्ते इत्यादौ दिवाऽभोक्तुर्देवदत्तस्य पीनत्वं रात्रिभोजनं विनाऽनुपपन्नम् (असम्भवि) इति ज्ञानात् रात्रिभोजनाकर्त्तृवृत्तिपीनत्वेन रात्रिभोजनं कल्प्यते तथा च भोजनस्य पीनत्वव्यापकतया व्यापकाभावस्य च व्याप्या भावव्याप्यतया साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिज्ञानात् अनुमितिरूपार्थापत्तिरुदेति । सेयमर्थापत्तिः मीमांसकमते प्रमाणान्तरं नैयायिकानां मते व्यतिरेकव्याप्तिज्ञानहेतुकानुमितिरिति भेदः ।

**अन्यथाभाव** पु० अन्यथा अन्यरूपेण भावः । यस्य यथारूपमुचितं तस्य ततोऽन्यथारूपेण भवने । अन्यरूपाश्रये च । "अतो मय्यन्यथाभावो न कर्त्तव्य इति" छा० उप० भा० "ज्ञातेऽपि विषये तवानुक्तिरित्येवं रूपो भाव इत्यर्थः ॥

**अन्यथाभूत** त्रि० अन्यथा अन्यप्रकारेण भूतः । प्रकारान्तरतां प्राप्ते । "अन्यथाभूतखिरिति" मु० बो० ।

**अन्यथावृत्ति** स्त्री अन्यथाऽन्यरूपेण वृत्तिः । चित्तादेः अन्यप्रकारेण वृत्तौ, (परिणामे) अन्यथास्थितौ च ।

**अन्यथासिद्ध** त्रि० अन्यथा अन्यप्रकारेण सिद्धः । अन्यप्रकारेण सिद्धे पदार्थे, न्यायादिमते अन्यथासिद्धिरूपाणां कारणताप्रतिबन्धकानां दोषाणामाश्रये वस्तुनि च । अन्यथासिद्धानि च पञ्च तत्र घटादौ दण्डत्वादिकमाद्यम् दण्डादिरूपं द्वितीयं, कुलालजनकः तृतीयः, गगनादि चतुर्थम् रासभादि पञ्चमम्, यथोक्तं भाषायाम् "येन सह पूर्व्व-